श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# श्रीमद्भागवत रसिक कुटुंब

# गजेन्द्र मोक्ष



जब विपत्ति हो अपरोक्ष
तब तारता है गजेंद्र मोक्ष

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(म्) व्यासं(न्), ततो जयमुदीरयेत्**

**नामसङ्कीर्तनं(म्) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

**श्रीमद्भागवतमहापुराणम्**
**अष्टमः(स्) स्कन्धः**
**अथ तृतीयोऽध्यायः**

**श्री शुक उवाच**

**एवं(म्) व्यवसितो बुद्ध्या, समाधाय मनो हृदि |**
**जजाप परमं(ञ्) जाप्यं(म्), प्राग्जन्मन्यनुशिक्षितम्।। (1)**

प्राग् + जन्मन् + यनु + शिक्षितम्

## गजेन्द्र उवाच

ॐ नमो भगवते तस्मै, यत एतच्चिदात्मकम्।
पुरुषायादिबीजाय, परेशायाभिधीमहि।। (2)

एतच् + चिदात् + मकम्, पुरुषाया + दिबीजाय, परेशाया + भिधीमहि

यस्मिन्निदं(म्) यतश्चेदं(म्), येनेदं(म्) य इदं(म्) स्वयम्।
योऽस्मात् परस्माच्च परस्-तं(म्) प्रपद्ये स्वयम्भुवम्।। (3)

यस्मिन् + निदं(म्), परस् + माच्च, स्वयम् + भुवम्

यः(स्) स्वात्मनीदं(न्) निजमाययार्पितं(ङ्),
क्वचिद् विभातं(ङ्) क्व च तत् तिरोहितम्।
अविद्धदृक् साक्ष्युभयं(न्) तदीक्षते,
स आत्ममूलोऽवतु मां(म्) परात्परः।। (4)

स्वात्म + नीदं(न्), निज + माययार् + पितं(ङ्), अविद् + धदृक्,
साक्ष्यु + भयं(न्), आत्म + मूलोऽ + वतु

कालेन पञ्चत्वमितेषु कृत्स्नशो,
लोकेषु पालेषु च सर्वहेतुषु।
तमस्तदाऽऽसीद् गहनं(ङ्) गभीरं(म्),
यस्तस्य पारेऽभिविराजते विभुः।। (5)

पञ्चत्व + मितेषु , कृत्स् + नशो, तमस् + तदाऽऽसीद्, पारेऽ + भिविराजते

न यस्य देवा ऋषयः(फ्) पदं(म्) विदुर्-
जन्तुः(फ्) पुनः(ख्) कोऽर्हति गन्तुमीरितुम्।
यथा नटस्याकृतिभिर्विचेष्टतो,
दुरत्ययानुक्रमणः(स्) स मावतु।। (6)

गन्तु + मीरि + तुम्, नटस्या + कृतिभिर् + विचेष्टतो, दुरत्यया + नुक्रमणः(स्)

दिदृक्षवो यस्य पदं(म्) सुमंगलं(म्),
विमुक्तसङ्गा मुनयः(स्) सुसाधवः।
चरन्त्यलोकव्रतमव्रणं(म्) वने,
भूतात्मभूताः(स्) सुहृदः(स्) स मे गतिः।। (7)

विमुक्त + सङ्गा , चरन्त्य + लोक + व्रत + मव्रणं(म्), भूतात्म+ भूताः(स्)

न विद्यते यस्य च जन्म कर्म वा,
न नामरूपे गुणदोष एव वा।
तथापि लोकाप्ययसंभवाय यः(स्),
स्वमायया तान्यनुकालमृच्छति।। (8)

लोका + प्यय + संभवाय , तान् + यनु + काल + मृच्छति

तस्मै नमः(फ्) परेशाय, ब्रह्मणेऽनन्तशक्तये।
अरूपायोरुरूपाय, नम आश्चर्यकर्मणे।। (9)

ब्रह्मणेऽ + नन्त + शक्तये ,

अरूपा + यो + रुरूपाय

नम आत्मप्रदीपाय, साक्षिणे परमात्मने।
नमो गिरां(म्) विदूराय, मनसश्चेतसामपि।। (10)

मनसश् + चेतसामपि

सत्त्वेन प्रतिलभ्याय, नैष्कर्म्येण विपश्चिता।
नमः(ख्) कैवल्यनाथाय, निर्वाणसुखसं(व्)विदे।। (11)

नैष् + कर् + म्येण, कैवल्य+ नाथाय ,

निर्वाण + सुख + सं(व्)विदे

नमः(श्) शान्ताय घोराय, मूढाय गुणधर्मिणे ।
निर्विशेषाय साम्याय, नमो ज्ञानघनाय च।। (12)

निर् + विशेषाय

क्षेत्रज्ञाय नमस्तुभ्यं(म्), सर्वाध्यक्षाय साक्षिणे।

पुरुषायात्ममूलाय, मूलप्रकृतये नमः॥ (13)

सर्वा + ध्यक्षाय, पुरुषा + यात्म + मूलाय

सर्वेन्द्रियगुणद्रष्ट्रे, सर्वप्रत्ययहेतवे।

असताच्छाययोक्ताय, सदाभासाय ते नमः॥ (14)

सर्वेन्द्रिय + गुण + द्रष्ट्रे , सर्व + प्रत्यय + हेतवे,

असताच् + छाय + योक्ताय

नमो नमस्तेऽखिलकारणाय,

निष्कारणायाद्भुतकारणाय।

सर्वागमाम्नायमहार्णवाय,

नमोऽपवर्गाय परायणाय॥ (15)

नमस्तेऽ + खिल + कारणाय ,निष्कारणायाद् + भुत + कारणाय

सर्वा + गमाम्नाय + महार्णवाय

गुणारणिच्छन्नचिदूष्मपाय,

तत्क्षोभविस्फूर्जितमानसाय।

नैष्कर्म्यभावेन विवर्जितागम-

स्वयंप्रकाशाय नमस्करोमि॥ (16)

गुणा + रणिच्छन्न + चिदूष् + मपाय, तत्क्षोभ + विस्फूर्जित + मानसाय

नैष्कर्म्य + भावेन , विवर्जिता + गम ,स्वयं(म्) + प्रकाशाय

मादृक्प्रपन्नपशुपाशविमोक्षणाय,

मुक्ताय भूरिकरुणाय नमोऽलयाय।

स्वांऽ(व्)शेन सर्वतनुभृन्मनसि प्रतीत-

प्रत्यग्दृशे भगवते बृहते नमस्ते॥ (17)

मादृक् + प्रपन्न + पशुपाश+ विमोक्षणाय ,भूरि+ करुणाय, सर्व+ तनुभृन् + मनसि ,प्रत्यग् + दृशे

आत्मात्मजाप्तगृहवित्तजनेषु सक्तैर्-

दुष्प्रापणाय गुणसङ्गविवर्जिताय।

मुक्तात्मभिः(स्) स्वहृदये परिभाविताय,

ज्ञानात्मने भगवते नम ईश्वराय॥ (18)

आत्मात्म + जाप्त + गृह + वित्त + जनेषु ,गुणसङ्ग + विवर्जिताय

यं(न्) धर्मकामार्थविमुक्तिकामा,

भजन्त इष्टां(ङ्) गतिमाप्नुवन्ति।

किं(न्) त्वाशिषो रात्यपि देहमव्ययं(ङ्),

करोतु मेऽदभ्रदयो विमोक्षणम्॥ (19)

धर्म + कामार्थ + विमुक्ति + कामा ,गति + माप् + नुवन्ति, देह + मव्ययं(ङ्), मेऽद + भ्रदयो

एकान्तिनो यस्य न कञ्चनार्थं(म्),

वाञ्छन्ति ये वै भगवत्प्रपन्नाः।

अत्यद्भुतं(न्) तच्चरितं(म्) सुमंगलं (ङ्),

गायन्त आनन्दसमुद्रमग्नाः॥ (20)

भगवत् + प्रपन्नाः , आनन्द + समुद्र + मग्नाः

तमक्षरं(म्) ब्रह्म परं(म्) परेश-

मव्यक्तमाध्यात्मिकयोगगम्यम्।

अतीन्द्रियं(म्) सूक्ष्ममिवातिदूर-

मनन्तमाद्यं(म्) परिपूर्णमीडे॥ (21)

मव्यक्त + माध्यात्मिक + योगगम्यम् ,सूक्ष्म + मिवाति + दूर , मनन्त + माद्यं(म्)

यस्य ब्रह्मादयो देवा, वेदा लोकाश्चराचराः।

नामरूपविभेदेन, फल्ग्व्या च कलया कृताः॥ (22)

लोकाश् + चराचराः, नाम + रूप + विभेदेन ,फल् + ग्व्या

यथार्चिषोऽग्नेः(स्) सवितुर्गभस्तयो,
निर्यान्ति संयान्त्यसकृत् स्वरोचिषः।
तथा यतोऽयं(ङ्) गुणसंप्रवाहो,
बुद्धिर्मनः(ख्) खानि शरीरसर्गाः॥ (23)

यथार् + चिषोऽग्नेः(स्), सवितुर् + गभस्तयो ,संयान्त्य + सकृत् , गुण + संप्रवाहो

स वै न देवासुरमर्त्यतिर्यङ्,
न स्त्री न षण्ढो न पुमान् न जन्तुः।
नायं(ङ्) गुणः(ख्) कर्म न सन्न चासन्,
निषेधशेषो जयतादशेषः॥ (24)

देवा + सुर + मर्त्य + तिर्यङ्, जयता + दशेषः

जिजीविषे नाहमिहामुया कि-
मन्तर्बहिश्चावृतयेभयोन्या।
इच्छामि कालेन न यस्य विप्लवस्-
तस्यात्मलोकावरणस्य मोक्षम्॥ (25)

नाह + मिहा + मुया, मन्तर् + बहिश्चा + वृतये + भयोन्या , तस्यात्म + लोका + वरणस्य

सोऽहं(म्) विश्वसृजं(म्) विश्व-मविश्वं(म्) विश्ववेदसम्।
विश्वात्मानमजं(म्) ब्रह्म, प्रणतोऽस्मि परं(म्) पदम्॥ (26)

विश्वात् + मान+ मजं(म्)

योगरन्धितकर्माणो, हृदि योगविभाविते।
योगिनो यं(म्) प्रपश्यन्ति ,योगेशं(न्) तं(न्) नतोऽस्म्यहम्॥ (27)

योग+ रन्धित + कर्माणो ,नतोऽस् + म्यहम्

नमो नमस्तुभ्यमसह्यवेग-

शक्तित्रयायाखिलधीगुणाय।

प्रपन्नपालाय दुरन्तशक्तये,

कदिन्द्रियाणामनवाप्यवर्त्मने॥ (28)

नमस् + तुभ्य + मसह्य + वेग , शक्ति + त्रयाया + खिलधी + गुणाय

दुरन्त + शक्तये , कदिन्द्रि + याणा + मन + वाप्य + वर्त्मने

नायं(म्) वेद स्वमात्मानं(म्), यच्छक्त्याहं(न्)धिया हतम्।

तं(न्) दुरत्ययमाहात्म्यं(म्), भगवन्तमितोऽस्म्यहम्॥ (29)

स्व + मात्मानं(म्), यच् + छक्त्या + हं(न्)धिया

दुरत्यय + माहात्म्यं(म्), भगवन्त + मितोऽस् + म्यहम्

श्रीशुक उवाच

एवं(ङ्) गजेन्द्रमुपवर्णितनिर्विशेषं(म्),

ब्रह्मादयो विविधलिङ्गभिदाभिमानाः।

नैते यदोपससृपुर्निखिलात्मकत्वात्,

तत्राखिलामरमयो हरिराविरासीत्॥ (30)

गजेन्द्र + मुपवर्णित + निर्विशेषं(म्), विविध + लिङ्ग + भिदा + भिमानाः

यदो + पससृपुर् + निखिलात् + मकत्वात् , तत्रा + खिला + मरमयो, हरिरा + विरासीत्

तं(न्) तद्वदार्त्तमुपलभ्य जगन्निवासः(स्),

स्तोत्रं(न्) निशम्य दिविजैः(स्) सहसं(व्)स्तुवद्भिः।

छन्दोमयेन गरुडेन समुह्यमानश्-

चक्रायुधोऽभ्यगमदाशु यतो गजेन्द्रः॥ (31)

तद् + वदार्त्त + मुपलभ्य, जगन् + निवासः(स्) ,सह + सं(व्)स्तु + वद्भिः

समुह्य + मानश् ,चक्रा + युधोऽभ्य + गमदाशु

सोऽन्तः(स्)सरस्युरुबलेन गृहीत आर्त्तो,

दृष्ट्वा गरुत्मति हरिं (ङ्) ख उपात्तचक्रम्।

उत्क्षिप्य साम्बुजकरं(ङ्) गिरमाह कृच्छ्रान्-

नारायणाखिलगुरो भगवन् नमस्ते॥ (32)

सोऽन्तः(स्)+ सरस् + युरु+ बलेन , उपात् + तचक्रम्

साम्बुज+ करं (ङ्), नारायणा+ खिल+ गुरो

तं(म्) वीक्ष्य पीडितमजः(स्) सहसावतीर्य,

सग्राहमाशु सरसः(ख्) कृपयोज्जहार।

ग्राहाद् विपाटितमुखादरिणा गजेन्द्रं(म्),

सं(म्)पश्यतां(म्) हरिरमूमुचदुस्त्रियाणाम्॥ (33)

सहसा + वतीर्य , कृपयोज् + जहार, विपाटित + मुखा + दरिणा

हरिरमू + मुचदुस्त्रि + याणाम्

इति श्रीमद्भागवते महापुराणे पारमहंस्यां (म्) संहितायामष्टमस्कन्धे गजेन्द्रमोक्षणे तृतीयोऽध्यायः ।।

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।

ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः।।

